## नवमः पाठः

# प्रतापी-प्रतापः

संस्कृतभाषायामाधुनिककालेऽपि काव्यरचनापरम्परा सम्पद्यते! विंशशताब्द्यां श्रीमदीशदत्तशास्त्रिवर्येण विरचिते 'प्रताप-विजय' इति नाम्नि खण्डकाव्ये महाराणाप्रतापचरितमधिकृत्य देशभक्तिः समभिव्यञ्जिता वर्तते।

यदा महाराणाप्रतापः चित्तौड़नगर्याः महेन्द्रपदेऽभिषिक्तोऽभूत् तदा यवनैरधिकृतां परतन्त्रतां स्वकीयां जन्मभूमिं च दृष्ट्वा व्यथाकुलः सन् प्रतिज्ञापितवान् यत्-यावत् प्रभाहतमदः मम भारतं मा भूयः प्रभारतमलं भुवने भवेन्न तावत् कदापि कथमपि नैव नूनं यास्यामि जन्मनगरं नगरं गरीयः। अहं तावत् कालपर्यन्तं पत्रपुटकेषु भोक्ष्ये, पर्णभवनेषु निवसिष्ये, पृथिव्यां तृणासने स्वप्स्ये च। इदं मामकीया प्रतिज्ञा कदापि व्यर्थां नहि भविष्यतीति वर्णनमुद्धृतेषु श्लोकेषु निदर्शनीयम्।

**अभूत् पुरा भारतभाविभासकः, स एकलिङ्गस्य सदङ्घ्र्युपासकः।**
**महाबली दुर्गचित्तौड़-शासकः प्रतापसिंहः परताप-नाशकः ॥1॥**

**अन्वयः** - पुरा महाबली सः प्रतापसिंहः दुर्गचित्तौड़ शासकः भारत भा विभासकः एकलिङ्गस्य सदङ्घ्रि उपासकः परतापनाशकः अभूत्।

**शब्दार्थः** - भा - ज्योतिः (प्रकाश), विभासकः - प्रकाशकः (प्रकाशित करने वाला), एकलिङ्गस्य - शिवस्य (एकलिङ्ग शिव का), सदङ्घ्रिः - अनन्यः (अद्वितीय), परतापनाशकः - परेषां सन्तापनाशकः (दूसरों के दुःख का नाश करने वाला)

**अटाट्यमानो ह्यटवीषु सन्ततं स्वतन्त्रतार्थी सकलत्रपुत्रकः।**
**अवाप दुःखं नहि किं व्यथाकुलः स वीरतायास्तनयो वरान्वितः।॥2॥**

**अन्वयः** - वीरतायाः वरान्वितः तनयः सकलत्रपुत्रकः स्वतन्त्रतार्थी व्यथाकुलः अटवीषु अटाट्यमानः दुःखानि अवाप।

**शब्दार्थः** - वरान्वित - श्रेष्ठः (श्रेष्ठ), सकलत्रपुत्रकः - पत्नी- पुत्र-सहितः (पत्नी और पुत्र के सहित)

अटाट्यमानः - भ्रमणं कुर्वाणः (घूमते हुए), अवाप - प्राप (पहुँचे)।

**अनाथ-नारीजन शोक-शोचनो गवां द्विजानां गलदश्रुमोचनः।**
**स एक एवाऽभवदार्य-रोचनः समुल्लसल्लोहित-लोल-लोचनः ॥3॥**

**अन्वयः** - अनाथनारीजनशोकशोचनः गवां द्विजानां गलदश्रुमोचनः समुल्लसत् लोहित लोललोचनः आर्यरोचनः स एक एव अभवत्।

**शब्दार्थः** - शोकशोचनः - शोकनिवारकः (शोक निवारक), गलद् - पतत् (गिरते हुए), अश्रुमोचनः- अश्रुमोचकः (आँसुओं को रोकने वाला), आर्यरोचनः - श्रेष्ठजनानां प्रियः (श्रेष्ठ लोगों का प्रिय)।

**क्षणे क्षणे यस्य रणे रतिर्भवेत् पदे पदे यो विनिपातयेदरीन्।**
**तदद्य किं विस्मयकारणं बुधाः! गृहे गृहे सम्प्रति चेत्स पूज्यते ॥4॥**

**अन्वयः** – बुधाः! यस्य रतिः क्षणे क्षणे रणे भवेत् यः पदे पदे अरीन् विनिपातयेत्, सः चेत् सम्प्रति गृहे गृहे पूज्यते तद् अद्य विस्मयकारणं किम्?

**शब्दार्थः** – बुधाः – विद्वान्सः (विद्वज्जन), रतिः – अनुरागः (प्रेम), अरीन् – शत्रून् (शत्रुओं को), विनिपातयेत् – पातनं करोति (गिराता है), चेत् – यदि।

**यावत्प्रभाहतमदो मम भारतं मा, भूयः प्रभारतमलं भुवने भवेन्न।**

**तावत्कदापि कथमप्यपि नैव नूनं, यास्यामि जन्मनगरं नगरं गरीयः ॥5॥**

**अन्वयः** – यावत् मम अदः प्रभाहतं भारतं भुवने भूयः वै अलं प्रभारतम् मा भवेत् तावत् अहं कथं अपि गरीयः नगरं जन्मनगरं कदापि नैव यास्यामि।

**शब्दार्थः** – अदः – एतत् (यह), प्रभाहतम् –मलिनम् (कान्तिहीन), प्रभारतम्–कान्तियुक्तम् (कान्तिमान्), गरीयः –श्रेष्ठः (श्रेष्ठ)

**अत्स्यामि पत्रपुटके न पुनर्न हैमे, वत्स्यामि पर्णभवने विजने न हर्म्ये।**

**स्थास्याम्यहं भुवि तृणासनकेषु तेषु, न त्वच्छरत्नरचितेषु नृपासनेषु ॥6॥**

**अन्वयः** – अहं पत्रपुटके अत्स्यामि हैमे पुनः न, विजने पर्णभवने वत्स्यामि हर्म्ये न, अहं भुवि तृणासनकेषु स्थास्यामि तु तेषु अच्छरत्नरचितेषु नृपासनेषु न।

**शब्दार्थः** – पत्रपुटके – पत्रस्य संपुटके (पत्ते के दोने में), अत्स्यामि – भोजनं करिष्यामि (भोजन करूँगा), हैमे – स्वर्णमयपात्रे (स्वर्ण पात्र में), विजने – जनशून्ये (मानव रहित), हर्म्ये – भवने (भवन में), अच्छरत्नरचितेषु – श्रेष्ठरत्न निर्मितेषु (श्रेष्ठ रत्नों से निर्मित)

**जाज्वल्यमानकिरणोऽस्तु दिनेषु चन्द्रः, सूर्यः समुल्लसतु पश्चिमदिक्प्रदेशात्।**

**शुष्कः स्वतो भवतु कल्पतरुः परन्तु, व्यर्था भविष्यति न मद्विहिता प्रतिज्ञा ॥7॥**

**अन्वयः** – चन्द्रः दिनेषु जाज्वल्यमानकिरणः अस्तु, सूर्यः पश्चिमदिक् प्रदेशात् समुल्लसतु, कल्पतरुः स्वतः शुष्को भवतु, परन्तु मद्विहिता प्रतिज्ञा व्यर्था न भविष्यति।

**शब्दार्थः** – जाज्वल्यमानकिरणः –देदीप्यमान रश्मयः (दिखाई देने वाली किरणें), समुल्लसतु – शोभां प्राप्नोतु (सुशोभित होवें), कल्पतरुः – कल्पवृक्षः (कल्पवृक्ष), मद्विहिता – अस्मत् कृता (मेरे द्वारा की गयी)

**शोकं विधेहि नहि भारतभृङ्ग! नूनं, यत्पारतन्त्र्यरजनीगतपद्मबद्धः।**

**भूयो भविष्यति चिराय सखेऽधुनैव, स्वातन्त्र्यसूर्यकिरणारुणसुप्रभातम् ॥ 8 ॥**

**अन्वयः** – हे भारतभृङ्ग! चिराय यत् पारतन्त्र्यरजनीगतपद्मबद्धः तत् शोकं नहि विधेहि, सखे! भूयः अधुनैव स्वातन्त्र्यसूर्य-किरणारुणसुप्रभातम् भविष्यति।

**शब्दार्थः** – पारतन्त्र्यरजनीगतपद्मबद्धः – परतन्त्रतारात्रिगत–कमलबद्ध (परतन्त्रतारूपी रात्रि के कमल में बंद ), विधेहि – कुरु (करो)

**प्राणादपि प्रियतमा निज-पूर्वजानां, मान्या पुनर्भवतु जन्मधरा स्वतन्त्रा।**

**साऽऽभारतीरितगुणावलिरद्य भूयः, सा भारती भवतु भारतभू-विभूत्यै ॥9॥**

**अन्वयः -** निजपूर्वजानां प्राणादपि प्रियतमा मान्या जन्मधरा पुनः स्वतन्त्रा भवतु सा आभारतीरितगुणावलिः सा भारती अद्य भूयः भारतभूविभूत्यै भवतु।

**शब्दार्थः -** आभारतीरितगुणावलिः - सरस्वतीयुक्तगुणशृङ्खला (सरस्वती से युक्त गुणों की पक्तियाँ), भारतभूविभूत्यै -भारतवर्षस्य भूमैरैश्वर्याम् (भारत भूमि की समृद्धि के लिए)

**धन्याऽस्ति तेन जननी जनकोऽप्यनन्यो, वंशश्च तेन सुसमस्तसमस्ततापः।**
**कीर्तिश्च तस्य भुवने भुवनैकभूषा, प्राणान् समुत्सृजति यो निजदेशहेतोः ॥10॥**

**अन्वयः -** तेन जननी धन्या जनकः अपि अनन्यः च, तेन वंशः सुसमस्त समस्ततापः च, तस्य भुवनैकभूषा भुवने कीर्तिः यः निजदेशहेतोः प्राणान् समुत्सृजति।

**शब्दार्थः -** सुसमस्त - सम्पूर्णः (पूरा), भुवनैकभूषा - जगतःएकशोभा (संसार की एक मात्र शोभा), समुत्सृजति - सम्यक्प्रकारेण त्यजति (भली भाँति त्याग करता है)

## अभ्यासः

**1. एकपदेन उत्तरत -**

(क) प्रतापसिंहः कस्योपासकः आसीत्?

(ख) परतापनाशकः कः आसीत्?

(ग) प्रतापसिंहः केषां शोक-शोचनः आसीत्?

(घ) प्रतापसिंहस्य क्षणे-क्षणे रतिः कस्मिन् कार्ये आसीत्?

(ङ) भारतभू-विभूत्यै का भवतु?

(च) निज-पूर्वजानां प्राणादपि प्रियतरा का?

**2. एकवाक्येन उत्तरत -**

(क) प्रतापसिंहः कस्य दुर्गस्य शासकः आसीत्?

(ख) प्रतापसिंहः कियत् कालपर्यन्तं जन्मनगरं गन्तुं नेच्छति?

(ग) जन्मधरायाः स्वतन्त्रताप्राप्तिपर्यन्तं प्रतापः कुत्र निवासाय प्रतिज्ञातवान् ?

(घ) केन कृता प्रतिज्ञा व्यर्था नाभवत्?

(ङ) कस्य कीर्तिः भुवनैकभूषा भवति?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) 'स्वातन्त्र्यसूर्यकिरणारुणसुप्रभातम्' इत्यस्य कोऽर्थः?

(ख) प्रतापः "वीरतायास्तनयः" कथं कथितः?

(ग) प्रताप-प्रतिज्ञा कासु दशासु विद्यमानाष्वपि व्यर्था न भविष्यति?

(घ) निजदेशहेतोः प्राणोत्सर्जकस्य कः प्रभावः?

(ङ) प्रतापस्य किं चारित्र्यवैशिष्ट्यम्?

**4. उचितं योजयत -**

| (अ) | | (ब) |
|---|---|---|
| (क) | अटाट्यमानो | कल्पतरुः |
| (ख) | अत्स्यामि | पर्णभवने |
| (ग) | वत्स्यामि | पत्रपुटके |
| (घ) | स्थास्यामि | अटवीषु |
| (ङ) | शुष्कः स्वतो भवतु | तृणासनकेषु |

**5. रिक्तस्थानानि पूरयत-**

(क) गृहे गृहे सम्प्रति चेत्स.............।

(ख) व्यर्था भविष्यति न....................।

(ग) ...........भारतभृङ्ग नूनम्।

(घ) सा भारती भवतु................।

(ङ) प्राणान् समुत्सृजति यो...........।

**6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) सदङ्घ्र्युपासकः

(ख) ह्यटवीषु

(ग) प्राणादपि

(घ) गुणावलिरद्य

(ङ) नृपासनेषु

**7. नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

(क) स्वतन्त्रतार्थी

(ख) पत्रपुटके

(ग) पद्मबद्धः

(घ) गुणावलिः

(ङ) महाबली

**8. भावविस्तारं कुरुत -**

(क) स वीरतायास्तनयो वरान्वितः।

(ख) शुष्कः स्वतो भवतु कल्पतरुः परन्तु व्यर्था भविष्यति न मद्विहिता प्रतिज्ञा।

(ग) भूयो भविष्यति चिराय सखेऽधुनैव स्वातन्त्र्यसूर्यकिरणारुणसुप्रभातम्।

(घ) सा भारती भवतु भारतभू-विभूत्यै।

(ङ) कीर्तिश्च तस्य भुवने भुवनैकभूषा प्राणान् समुत्सृजति यो निजदेशहेतोः।

**9. अधोलिखितपदानां धातुं लकारं पुरुषं वचनं च लिखत-**

| | पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | अभूत् | -------- | -------- | -------- | -------- |
| (ख) | अवाप | -------- | -------- | -------- | -------- |
| (ग) | पूज्यते | -------- | -------- | -------- | -------- |
| (घ) | यास्यामि | -------- | -------- | -------- | -------- |
| (ङ) | अत्स्यामि | -------- | -------- | -------- | -------- |
| (च) | भवतु | -------- | -------- | -------- | -------- |
| (छ) | विधेहि | -------- | -------- | -------- | -------- |
| (ज) | भविष्यति | -------- | -------- | -------- | -------- |
| (झ) | समुत्सृजति | -------- | -------- | -------- | -------- |
| (ञ) | अस्ति | -------- | -------- | -------- | -------- |

**10. अधोलिखितानां श्लोकानामन्वयं कुरुत -**

(क) क्षणे क्षणे ................चेत्स पूज्यते।

(ख) अभूत् पुरा............परताप-नाशकः।

(ग) अत्स्यामि पत्रपुटके..........नृपासनेषु।

(घ) जाज्वल्यमान............प्रतिज्ञा।

(ङ) प्राणादपि प्रियतमा..........भारतभू-विभूत्यै।

(च) धन्यास्ति तेन.............निजदेशहेतोः।

**11 प्रतापेन का प्रतिज्ञा कृता?**

**12 प्रदत्तपाठमवलम्ब्य प्रतापस्य चारित्र्यवैशिष्ट्यं लिखत।**

## योग्यताविस्तारः -

- महाराणाप्रतापस्य जीवनवृत्तं पठत।
- महाराणाप्रतापविषयकम् अन्यमपि साहित्यं पठत।
- प्रतापस्य देशभक्तिविषयकं सम्भाषणं कक्षायां कुरुत।
- पाठेऽस्मिन् समागतान् श्लोकान् लयबद्धं गायत।